# Shri Paduka Ashtakam

# શ્રીપાદુકાષ્ટકમ્

## Document Information

Text title : Shri Paduka Ashtakam 2

File name : pAdukAShTakam2.itx

Category : deities_misc, gurudev, aShTaka

Location : doc_deities_misc

Proofread by : Vani V.

Latest update : July 22, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

July 23, 2023

*sanskritdocuments.org*

# શ્રીપાદુકાષ્ટકમ્

શ્રીસમઙ્ગિતમવ્યયં પરમપ્રકાશગોચરં
ખેદવર્જિતમપ્રમેયમનન્તમઝ્ઝિતકલ્મષમ્ ।
નિર્મલં નિગમાન્તનમદ્ભુતમપ્યતર્ક્યમનુત્તમં
પ્રાતરેવ હિ માનસે ગુરુપાદુકાદ્વયમાશ્રયે ॥ ૧॥

નાદબિન્દુ કલાત્મકં દશનાદ વેદ વિનોદિતં
મન્ત્રરાજપરાજિતં નિજમણ્ડલાન્તરભાસિતમ્ ।
પઞ્ચવર્ણમખણ્ડમદ્ભુતમાદિકારણમચ્યુતં
પ્રાતરેવ હિ માનસે ગુરુપાદુકાદ્વયમાશ્રયે ॥ ૨॥

હન્તચારુમખણ્ડનાદમનેક વર્ણમરૂપકં
શબ્દજાલમયં ચરાચર જન્તુદેહનિરાસિનમ્ ।
ચક્રરાજમનાહતોદ્ભવમેઘવર્ણમતત્પરં
પ્રાતરેવ હિ માનસે ગુરુપાદુકાદ્વયમાશ્રયે ॥ ૩॥

બુદ્ધિરૂપમબદ્ધકં ત્રિદૈવકૂટસ્થનિવાસિનં
નિશ્ચયં નિરતપ્રકાશમનેક સદ્રુચિરૂપકમ્ ।
પઙ્કજાન્તરખેલનં નિજશુદ્ધસખ્યમગોચરં
પ્રાતરેવ હિ માનસે ગુરુપાદુકાદ્વયમાશ્રયે ॥ ૪॥

પઞ્ચપઞ્ચહૃષિકદેહમનશ્ચ તુષ્કપરસ્પરં
પઞ્ચભૂતનિકામષટ્ક સમીરશબ્દમભીકરમ્ ।
પઞ્ચકોશગુણત્રયાદિ સમસ્તધર્મવિલક્ષણં
પ્રાતરેવ હિ માનસે ગુરુપાદુકાદ્વયમાશ્રયે ॥ ૫॥

પઞ્ચમુદ્રસુલક્ષ્યદર્શન ભાવમાત્રનિરૂપણં
વિદ્યુદગ્નિ દગ્ધતિગ વિનોદ કાન્તિવિવર્તનમ્ ।
ચિન્મયત્રય વર્તિનં સદસદ્વિવેકમયાચિકં
પ્રાતરેવ હિ માનસે ગુરુપાદુકાદ્વયમાશ્રયે ॥ ૬॥

પઞ્ચવર્ણશુકં સમસ્ત રુચિર્વિચિત્ર વિચારિણં
ચન્દ્ર સૂર્ય ચિદગ્નિ મણ્ડલ મણ્ડિતં ઘન ચિન્મયમ્ ।
ચિત્કલાપરિપૂર્ણમણ્ડલ ચિત્સમાધિનિરીક્ષિતં
પ્રાતરેવ હિ માનસે ગુરુપાદુકાદ્વયમાશ્રયે ॥ ૭॥

સ્થૂલસૂક્ષ્મસકારણાન્તરખેલનં પરિપાલનં
વિશ્વતૈજપપ્રાજ્ઞ ચેત સમન્તરાત્મનિજસ્થિતિમ્ ।
સર્વકારણમીશ્વરં નિટલાન્તરાલવિહારિણં
પ્રાતરેવ હિ માનસે ગુરુપાદુકાદ્વયમાશ્રયે ॥ ૮॥

તપ્તકાઞ્ચનદીપ્યમાનમહાનુરૂપમરૂપકં
ચન્દ્રકાન્તરતારકૈરવમુજ્વલં પરમં પદમ્ ।
નીલનીલરથમધ્યમસ્થિત વિદ્યુદાભવિભાસિતં
પ્રાતરેવ હિ માનસે ગુરુપાદુકાદ્વયમાશ્રયે ॥ ૯॥

ઇતિ શ્રીપાદુકાષ્ટકં સમ્પૂર્ણમ્ ।

Proofread by Vani V.

*Shri Paduka Ashtakam*

pdf was typeset on July 23, 2023

Please send corrections to *sanskrit@cheerful.com*